# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : न पदान्तद्विर्वचनवरेयलोप...............

पाठ्यांशसंख्या : 9

पाठ्यांशस्य मुख्याः अंशाः :

1) न पदान्तसूत्रे विधिशब्दो भावसाधनः।

2) पदान्तशब्दः सप्तमीसमासः।

3) पूर्वत्रासिद्धीये न स्थानिवत्।

4) महिष्मान् इत्यत्र जश्त्वाभावः।

5) द्विर्वचनादिग्रहणप्रत्याख्यानम्।

6) दीर्घग्रहणस्य अप्रत्याख्यानम्।

विषयसूची

Pathshala पाठशाला A Gateway to all Post Graduate Courses

1.0 : शेखरे - अत्र विधिशब्दो भावसाधनः

2.0 : पदान्तेत्यत्र अन्तशब्दश्चरमावयववाची

2.1 : वेतस्वान् इत्यादौ कथं न दोषः

2.2 : महिष्मानित्यत्र जश्त्वं कथं न

3.0 : क्विलुगुपधात्वेत्यादीनि वार्तिकानि

1.0 शेखरे - अत्र विधिशब्दो भावसाधनः

विपूर्वात् धाञः किप्रत्यये कृते विधिशब्दः सिध्यति। अचः परस्मिन् पूर्वविधावित्यत्र विधिशब्दस्य कर्मसाधनत्वं भावसाधनत्वञ्च तन्त्रेण आश्रितम्। अत्रापि तथैव वा इति संशयः। किप्रत्ययोऽयं किं कर्मणि वा भावे वा - इति।

यदि कर्मिणि किः तर्हि विधिशब्दस्य विधेयं- कार्यम्- इत्यर्थः। पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्ण-अनुस्वार-दीर्घ-जश्-चर् इत्येतैः सह विधिशब्दस्य प्रत्येकं सम्बन्धात् पदान्तस्य कार्ये, द्विर्वचनरूपे कार्ये, परे परे कार्ये.... इत्येवं क्वचित् सामानाधिकरण्येन क्वचित् वैयधिकरण्येन च अन्वयो वक्तव्यः।

यदि भावे किः तर्हि विधिशब्दस्य विधानमित्यर्थः। तदा पदान्तस्य विधाने, द्विर्वचनस्य विधाने, वरे विधाने, यलोपस्य विधाने इत्येवं कर्मषष्ठ्यन्ततयैव अन्वयः। वरे इत्येकत्रैव तु अन्यथा।

विधिशब्दस्य कर्मसाधनत्वे पदान्तस्य विधिरिति सम्बन्धसामान्यषष्ठ्यन्तस्य समासः। पदान्तस्य कार्यं, पदान्तोद्देश्यकं कार्यमित्यर्थः। पदान्तस्य कार्ये कर्तव्ये परनिमित्तकः अच आदेशो न स्थानिवत् स्यात् - इत्यर्थः। अस्मिन् पक्षे वेतस्वानित्यादौ दोषो न भविष्यति। वेतस् मत् इति जाते परनिमित्तकः टिलोपः स्थानिवत् भवत्येव सकारस्य रुत्वे कर्तव्ये, तदर्थं पदसंज्ञायां वा कर्तव्यायां, सकारस्य पदान्तत्वाभावात्। यदि सकारः पदान्तोऽभविष्यत् तर्हि स्थानिवत् नाभविष्यत्। तथाच स्थानिवद्भावसत्त्वात् सकारान्तस्य पदत्वं, तद्द्वारकरुत्वं च न भविष्यति।

परन्तु अस्मिन् पक्षे षडिक इत्यत्र जश्त्वं न सिध्येत्। तथाहि - षडङ्गुलिशब्दात् बह्वचो मनुष्यनाम्नष्ठज्वा इति सूत्रेण ठचि, ठाजादावूर्ध्वं द्वितीयादचः

इति सूत्रेण ङ्गुलि इत्यंशस्य लोपे ठस्येक इति इकादेशे षड इक। इकप्रत्ययनिमित्तकं भत्वमिदानीं षड इत्यकारान्तस्य भवति। ततश्च, यस्येति च इत्यकारलोपे षड् इक। षड इत्यकारान्तनिष्ठा भसंज्ञा स्थानिवद्भावेन षड् इत्यस्मिन् डकारान्ते अतिदिश्यते। नच अकारलोपस्य अचः परस्मिन् पूर्वविधौ इति स्थानिवद्भावात् अकारान्तस्यैव भसंज्ञा भविष्यति, अकारेण व्यवधानात् डकारान्ते भसंज्ञा न लभ्या इति वाच्यम्। डकारान्तस्य अन्तर्वर्तिविभक्त्या पदत्वात्, डकारस्य पदान्तत्वात्, डकारान्ते भसंज्ञायाश्च पदसंज्ञानिवृत्तिसम्पादनद्वारा पदान्तडकारस्य षकारत्वप्रत्यापत्त्यर्थत्वात्, एवं परम्परया भसंज्ञाया अपि पदान्तोद्देश्यकविधित्वात् नपदान्तेति स्थानिवद्भावनिषेधात्। तथाच षडित्यस्य भत्वे सति एकसंज्ञाधिकारानुरोधेन पदसंज्ञाया निवृत्तौ तन्निमित्तकजस्त्वस्यापि निवृत्तिः स्यात्। षषिक इति लभ्यते, षडिक इति चेष्यते। तदुक्तं भाष्ये -यदि कर्मसाधनः षडिको न सिध्यतीति।

भावार्थे किप्रत्ययः इति स्वीकारे तु विधानमित्यर्थः। पदान्तस्येति कर्मणि षष्ठ्यन्तस्य समासः। पदान्तकर्मकं विधानमित्यर्थः। पूर्वस्मिन् पक्षे उद्देश्यस्य पदान्तत्वे सति निषेधप्रवृत्तिः, अस्मिन् पक्षे विधेयस्य पदान्तत्वेन चिकीर्षितत्वे निषेधप्रवृत्तिरिति भेदः। वेतस्वान् इत्यादौ उद्देश्यस्य सकारस्य पदान्तत्वाभावेऽपि विधेयस्य रुत्वस्य पदान्तत्वेन चिकीर्षितत्वात् निषेधप्रवृत्तौ स्थानिवद्भावाभावात् सकारन्तस्य पदत्वं तद्द्वारा रुत्वं च प्राप्नोतीति दोषः। षडिक इत्यत्र तु न दोषः। तथाहि- षड् इक इति जाते डकारः पदान्त एवास्ति। तस्मान्न केनापि सूत्रेण डकारो वा तत्स्थाने कार्यान्तरं वा न कर्तव्यमस्ति। भत्वं सम्पाद्य पदत्वनिवर्तनद्वारा

षकारप्रत्यापादनं तु न पदान्तत्वेन विधानं, किन्तु भान्तत्वेन विधानम्। अतः नपदान्तसूत्रं न प्रवर्तते।

## 2.0 पदान्तेत्यत्र अन्तशब्दश्चरमावयववाची

**शेखरे - पदान्तेत्यत्र अन्तशब्दश्चरमावयववाची। कर्मषष्ठ्या समासः। तेन एषो यन् हसतीत्यादौ एतत्तदोः इति सुलोपो न। इणः शतरि यन् इति रूपम्। तत्र यणः स्थानिवत्त्वात्। उत्वे च न स्थानिवत्। अनेन निषेधात्। स्पष्टं चेदं भाष्ये इति भाष्यप्रदीपोद्योते निरूपितम्।**

सूत्रस्थे पदान्तशब्दे अन्तशब्दः चरमावयववाची। पदान्तस्य इति कर्मषष्ठ्यन्तस्य विधिशब्देन समासः। पदचरमावयवकर्मकं विधानमित्यर्थः। तथाच - पदमुद्दिश्य यदा चरमावयवत्वेन किञ्चिद् विधेयं तदा परनिमित्तकः अच आदेशो न स्थानिवत् इत्यर्थः सूत्रप्रथमांशस्य।

यथा - वाक्यसंस्कारे एतद् सु इण् शतृ इत्यत्र प्रक्रिया। त्यदाद्यत्वे, तकारस्य सत्वे षत्वे च एष स्। इण् शतृ इत्यत्र च इ अत् इत्यवस्थायाम् इणो यण् इति यणादेशे यत् इति। विभक्तिकार्ये कृते यन् इति। एष स् यन्। अत्र शतृप्रत्ययनिमित्तकस्य यकारादेशस्य स्थानिवद्भावात् एतत्तदोः सुलोपोकोरनञ्समासे हलि इत्यनेन विहितः सुलोपो न भवति, हल्परकत्वाभावात्। एष स् यन् - एष र् यन्। हशि च इत्युत्वे एषो यन्। अत्र पदमुद्दिश्य चरमावयवत्वेन न किञ्चिद् विधीयत इति कृत्वा नपदान्तेति निषेधो नास्ति। हशि च इत्युत्वं तु प्रवर्तिष्यत एव। उत्वे कर्तव्ये तु स्थानिवद्भावनिषेधात्। तथाहि - रेफस्य उकारः क्रियमाणः पदस्य चरमावयवो भविष्यति। एष उ यन्। उकारस्य पदचरमावयवत्वात् न पदान्तेति निषेधो नात्र भविष्यति। एषो यन्।

**2.1 वेतस्वान् इत्यादौ कथं न दोषः**

**शेखरे - अत्र पदे अन्त इति सप्तमीसमासो भाष्ये उक्तः। तेन प्रत्यासत्त्या पदे परतः चरमावयवे कार्ये कर्तव्ये परपदस्थाजादेशस्यैव अनेन स्थानिवत्त्वनिषेध इति वेतस्वान् इत्यादौ न दोषः।**

सूत्रे पदस्यान्तः पदान्तः इति न षष्ठीसमासः। किन्तु, पदे अन्तः पदान्त इति सप्तमीसमासः। तथाच, पदे परे अच आदेशः स्थानिवत् न स्यात् पूर्वस्य चरमावयवे कर्तव्ये - इत्यर्थः। प्रत्यसत्त्या अच आदशः परपदस्थो बोध्यः। एवं सप्तमीसमासाश्रयणे फलम् - वेतस्वान् इत्यादौ सकारस्य रुत्वाभावः। तथाहि- कुमुदनडवेतसेभ्यो ड्मतुप् इति सूत्रेण वेतसशब्दात् ड्मतुपि टेः इति सूत्रेण टिलोपे वेतस् मत् इत्यवस्थायां ससजुषो रुः इत्यनेन सकारस्य रुत्वं प्राप्नोति। यदि पदान्तशब्दे षष्ठीसमास आश्रीयेत तर्हि रुत्वस्य पदचरमावयवत्वात् तस्मिन् कर्तव्ये टिलोपस्य यत् स्थानिवत्त्वम् अचः परस्मिन् इत्यनेन लभ्यते तत्प्रतिषेधः प्राप्नोति। तथाच रुत्वं स्यात्। पदे अन्त इत्यर्थे तु पदपरकत्वाभावात् , अजादेशस्य लोपस्य परपदस्थत्वाभावात्, स्थानिवत्त्वनिषेधो न भविष्यति। ततश्च स्थानिवद्भावेन पदस्य अकारान्तत्वात्, सकारान्तत्वाभावात् रुत्वाभावः सिध्यति।

**शेखरे - न चैवमपि पूर्वत्रासिद्धीये न स्थानिवदिति निषेधोऽत्र दुर्वारः। पदे अन्त इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्धे इत्यत्र पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्।**

प्रकृतसूत्रस्थभाष्ये पूर्वत्रासिद्धीये न स्थानिवत् इति वार्तिकं पठितं, याष्टिः पाक्तिः इत्यादिसिध्यर्थम्। तथाच पदान्त इत्यंशेन कृतस्य स्थानिवत्त्वनिषेधस्याभावेऽपि, (पूर्वत्रासिद्धीये न स्थानिवद्) इति वार्तिकेन निषेधः

प्राप्नोत्येव। तथाहि - वेतस + इमतुप् - ( वेतस् + मत् )। अत्र 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वार्तिकेन स्थानिवद्भावनिषेधात् रुत्वे कर्तव्ये टिलोपस्य स्थानिवत्त्वाभावात् 'ससजुषो रुः' इति त्रैपादिकेन सूत्रेण सकारस्य रुत्वं प्राप्नोति। - इत्याक्षेपः। समाधानम् - वेतस् + मत् इत्यत्र रुत्ववारणाय स्थानिवद्भावनिषेधाभावार्थं भाष्यकृता 'पदे अन्तः = पदान्त ' इति सप्तमीसमासाश्रयणादेव "यस्मिन् त्रैपादिके विधौ पदचरमावयवो विधीयते तत्र स्थानिवद्भावनिषेधो नास्ति , किन्तु तदतिरिक्तेष्वेव त्रैपादिकेषु तेन वचनेन स्थानिवद्भावनिषेधः" -इति स्वीकर्तव्यं, भाष्यकारप्रामाण्यात्।

**2.2 महिष्मानित्यत्र जश्त्वं कथं न**

**शेखरे - अत एव महिष्मानित्यत्र जश्त्वं न।**

वेतस + इमतुप्। 'टेः' इति सूत्रेण टिलोपे -( वेतस् + मत् )। अत्र 'ससजुषो रुः' इति त्रैपादिकेन सूत्रेण रुत्वं प्राप्नोति। किन्तु 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वार्तिकेन स्थानिवद्भावनिषेधात् कथं रुत्वे कर्तव्ये टिलोपस्य स्थानिवत्त्वम्।

उच्यते- वेतस् + मत् इत्यत्र रुत्ववारणाय भाष्यकृता 'पदे अन्तः = पदान्त' इति सप्तमीसमासमाश्रित्य स्थानिवद्भावनिषेधनिवारणात् "यस्मिन् त्रैपादिके विधौ पदचरमावयवो विधीयते तत्र स्थानिवद्भावनिषेधो नास्ति, किन्तु तदतिरिक्तेष्वेव त्रैपादिकेषु तेन वचनेन स्थानिवद्भावनिषेधः" -इति ज्ञायते। भाष्यकारप्रामाण्यात्। अत एव महिषाच्चेति वक्तव्यमिति वार्तिकेन महिषशब्दात् इमतुपि टिलोपे तस्य स्थानिवत्त्वमाश्रित्यैव षकारस्य 'झलां जशोऽन्ते' इत्यनेन त्रैपादिकेन प्राप्तं जश्त्वं वार्यते। 'झलां जशोऽन्ते' इत्यनेन पदचरमावयवो विधीयते।

**शेखरे - सूत्रे जशपदेन झलां जश् झशि इत्यस्यैव ग्रहणम्। चर्सन्निहितस्यैव ग्रहणौचित्यात्। कार्यकालपक्षेपि त्रिपाद्यामन्तरङ्गपरिभाषा न प्रवर्तत इति वक्ष्यते इति न तयास्य सिद्धिः।**

अत्र संशयः - महिष् + मत् इत्यवस्थायाम् 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वचनस्य पदचरमावयवविधायकातिरिक्तविषयकत्वेन अप्राप्तावपि अस्मिन्नेव नपदान्तसूत्रे 'जश्-विधौ स्थानिवन्न' इत्यंशेन स्थानिवत्त्वनिषेधः प्राप्नोत्येव - इति।

**उत्तरम्** - झलां जशोऽन्ते इति अष्टमाध्याये द्वितीयपादे विद्यते। झलां जश् झशि - इति चतुर्थपादे अभ्यासेचर्च खरिच इति चर्विधायकसूत्रसमीपे विद्यते। तथाच 'जश्-चर्-विधिषु' इत्यत्र चर्-सन्निहितस्य जशत्वस्यैव ग्रहणमुचितम्। एवं स्वीकारे सति न दोषः।

**अत्र पुनः संशयः** - महिष् + मत् इत्यत्र पदसंज्ञकस्य महिष् इत्यस्य षकारस्य 'झलां जशोऽन्ते' इति जश्त्वं कर्तव्यम् , टिलोपस्तु ड्मतुपि परे महिष् इत्यस्य कर्तव्यः। तथाच (महिष् ड्मतुप्) इति टिलोपस्य अङ्गम् , निमित्तनिमित्तिसमुदायः। (महिष्) इत्येतावान् अंशः जश्त्वस्य अङ्गम्, तच्च टिलोपशास्त्रीयनिमित्तनिमित्तिसमुदान्तर्गत इति अन्तरङ्गं जश्त्वं , टिलोपो बहिरङ्गः। अतः 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषयैव जश्त्वं वारयितुं शक्यते खलु -इति। अत्र समाधानम् - बहिरङ्गपरिभाषा सप्तमाध्याये वाह ऊठ् इत्यत्र ज्ञापिता। ततश्च बहिरङ्गपरिभाषादृष्ट्या त्रैपादिकशास्त्राणाम् असिद्धत्वात् यथोद्देशं संज्ञापरिभाषमिति पक्षे बहिरङ्गपरिभाषया त्रैपादिकसम्बन्धिनी व्यवस्था न शक्यते कर्तुम्। कार्यकालं संज्ञापरिभाषमिति पक्षेऽपि बहिरङ्गपरिभाषया व्यवस्था न भविष्यति। कुतः। यत्र बहिरङ्गशास्त्रं सिद्धकाण्डे विद्यते, अन्तरङ्गशास्त्रं तु असिद्धकाण्डे विद्यते, तत्र पूर्वत्रासिद्धमित्यनेन कण्ठत उक्तेन

सूत्रेण असिद्धकाण्डस्थस्य असिद्धत्वमुच्यते, आनुमानिक्या बहिरङ्गपरिभाषया तु सिद्धकाण्डस्थस्य असिद्धत्वमुच्यते। तयोः विरोधे आनुमानिकीं परिभाषां सूत्रमेव बाधत इति युक्तम्। एवञ्च सर्वथा त्रिपाद्यां बहिरङ्गपरिभाषायाः प्रवृत्तिः नास्तीति सिद्धान्तः। किञ्च जश्त्वस्य टिलोपस्य च निमित्तनिमित्तिसमुदायः समानः। तथाहि- पदसंज्ञाद्वारा जश्त्वं प्रत्यपि ड्मतुप् निमित्तमेव। अतः टिलोपजश्त्वयोः अन्यतरस्य अन्तरङ्गत्वं बहिरङ्गत्वं वा वक्तुं न शक्यते।

**शेखरे - गोचेत्यादौ गतिकारकोपपदानाम् इत्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासः।**

ननु यदि पदे अन्तः पदान्त इति सप्तमीसमास आश्रीयते तर्हि गोचा इत्यादौ अवङादेशः प्राप्नोति। तथाहि - 'गामञ्चती'त्यर्थे गोशब्दे उपपदे ऋत्विग्दधृक्स्रग्दिग्-गुष्णिगञ्चुयुजिक्रुञ्चां च इति सूत्रेण अञ्चुधातोः क्विन्। गो ङस् अञ्च् क्विन्। उपपदमतिङ् इति सूत्रेण समासः। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः - इति वचनात् सुबुत्पत्तेः पूर्वमेव समासः। 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण नलोपे, सुपो धातुप्रातिपदिकयोरिति ङसो लुकि गो अच् क्विन्। क्विनः सर्वस्य लोपः। ततः तृतीयैकवचने - गो अच् टा। 'अचः' इति सूत्रेण अल्लोपे - (गो च्) + आ। अत्र गोचा इति रूपमिष्यते। परन्तु, अल्लोपस्य स्थानिवद्भावेन अवङादेशः प्राप्नोति, 'सर्वत्र विभाषा गोः' इति। सुबुत्पत्तेः प्राक् समासात् अच् इत्यस्य पदत्वाभावात् पदे अन्तः इति सप्तमीसमासे स्वीक्रियमाणे अवङादेशस्य पदान्तविधित्वाभावात् स्थानिवद्भावनिषेधो न सिध्येत्।

**अत्र समाधानम्** - गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः इति वचनमनित्यम्। अत एव सा हि तस्य धनक्रीता इत्यादयः प्रयोगाः सिध्यन्ति। प्रकृते

सुबुत्पत्त्यनन्तरमेव समासः, (गो ङस्)+(अञ्च् क्विन् सु) इति। तत्र सुब्लुकि नलोपे क्विनो लोपे गो अच्। ततः तृतीयायाम् अल्लोपे गो च् आ इति जाते च् इत्यस्य प्रत्ययलक्षणेन सुबन्तत्वात् पदत्वे सति, तस्मिन् परे अवङादेशस्य सप्तमीसमासपक्षे पदान्तविधित्वात् स्थानिवद्भावनिषेधः।

**शेखरे - उत्तरपदत्वे च इति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्या उत्तरपदस्य कार्यित्वे एवेति न दोषः।**

ननु गो च् आ इति स्थिते च् इत्यस्य प्रत्ययलक्षणेन कथं पदत्वमुच्यते। उत्तरपदत्वे चापदादिविधौ इति प्रत्ययलक्षणनिषेधोऽस्ति। उत्तरपदस्य पदत्वे कर्तव्ये प्रत्ययलक्षणं नेति तदर्थः - इति चेन्न। प्रत्ययलक्षणेन उत्तरपदस्य पदत्वे प्राप्ते तन्निषेधो हि प्रत्यासत्त्या उत्तरपदस्यैव पदत्वप्रयुक्तकुत्वादिकार्याभावाय कृतः, न तु अन्योद्देश्यककार्यं प्रति निमित्तत्वे प्राप्ते तदभावाय। प्रकृते च् इत्यतः पूर्वस्य गो इत्यस्य अन्तावयवत्वेन अवङि प्राप्ते तस्य च् इत्यस्य उत्तरपदस्य पदत्वमाश्रीयते, न तु च् इत्यस्यैव कस्मैचित् कार्याय। अतः प्रत्ययलक्षणं निर्बाधम्।

**पदे इति पदत्वयोग्योपलक्षणं वा। अत्रेदं भाष्यमपि मानम्।**

अथवा पदे अन्तः इत्यत्र पदशब्दो न मुख्यं पदसंज्ञकमाचष्टे, किन्तु पदत्वयोग्यमित्यर्थकः सः। पदे इत्यत्र 'पदत्वयोग्ये' 'प्रातिपदिके' इति व्याख्यनाश्रयणात् नास्ति स दोषः। उत्तरपदत्वे चापदादिविधाविति वार्तिकस्य, पदे अन्तः इत्यत्र पदशब्दस्य वा ईदृशार्थस्वीकारे पदान्त इत्यत्र सप्तमीतत्पुरुषाश्रयणपरं भाष्यमेव प्रमाणम्।

अथवा - गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः इति वचनानुसारेण गोशब्दस्य सुबुत्पत्तेः प्राक् समासेपि दोषो नास्तीत्येवंपरमिदं शेखरवाक्यम्।

**शेखरे - अत्र पदचरमावयवादिसाधकः प्रतिबन्धकश्च स्थानिवद्भावो निषिध्यते। विनिगमनाविरहात्।**

स्थानिवद्भावे सति यदि यः कश्चिद् वर्णः पदचरमावयः आपद्यते तर्हि तस्य वर्णस्य पदचरमावयवत्वं मा भूत् इत्येतदर्थं स्थानिवद्भावप्रतिषेधो भवितुमर्हति। यथा -गामञ्चतीत्यर्थे गवाच् इति प्रातिपदिकात् तृतीयैकवचने गो अच् आ इति स्थिते अचः इत्यल्लोपे तस्य स्थानिवद्भावे सति सर्वत्र विभाषा गोः इति सूत्रेण अवङादेशः क्रियते चेत् स पदचरमावयवो भविष्यतीति तथा मा भूत् इति कृत्वा स्थानिवद्भावो निषिध्यते। तथाच गोचा इति सिध्यति।

तथा वेतस्वान् इत्यत्र वेतस ड्मतुप् इति स्थिते टिलोपे वेतस् मत् इति जाते टिलोपस्य स्थानिवद्भावे सति सकारान्तस्य पदसंज्ञा भवेत्, तद्द्वारा पदान्तस्य सकारस्य रुत्वं भवेत्। रुश्च कृतः पदचरमावयवो भविष्यति। तथाच- पदचरमावयवत्वेन रुत्वस्य साधकः, तदर्थमपेक्षितायाः पदसंज्ञायाः साधकः टिलोपस्य स्थानिवद्भावः निषिध्यते। अत्र परम्परया पदचरमावयवसाधकत्वं स्थानिवद्भावस्य। एषो यन् हसतीत्यत्र एष सु इ शतृ इति स्थिते रुत्वे कृते, इणो यणिति यणादेशे च कृते एष रु यन् इति जाते यणादेशस्य स्थानिवद्भावे सति हशि च इत्युत्वं न सिध्येत्। रुत्वस्य उत्वं क्रियमाणं पदचरमावयवो भविष्यतीति, तत्प्रतिबन्धकः स्थानिवद्भावः प्रकृते नपदान्तेत्यनेन निषिध्यते। पदचरमावयवप्रतिबन्धकस्य स्थानिवद्भावस्य निषेधे च कृते पदचरमावयवः सिध्यति। तथाच स्थानिवद्भावाभावे हशपरकत्वात् उत्वे एषो यन् इति सिध्यति।

दधि ऋचतीत्यर्थे कर्मण्यण् इति सूत्रेण दधिशब्दे उपपदे ऋच् धातोः अणि दधि ऋच् अण् इति जाते पुगन्तलघूपधस्य च इति ऋकारस्य गुणे रपरत्वे दधि

अर्च् अण्। अत्र परनिमित्तकस्य गुणादेशस्य स्थानिवद्भावे सति ऋत्यक इति प्रकृतिभावः प्राप्नोति। ततश्च इको यणचीति यणादेशस्य पदचरमावयवत्वं न सिध्येत्। पदचरमावयवयणादेशप्रतिबन्धकस्य प्रकृतिभावस्य प्रतिबन्धकः स्थानिवद्भावनिषेधः अत्र। तथाच अत्र परम्परया पदचरमावयवस्य प्रतिबन्धकः स्थानिवद्भावः।

पदान्तादेः साधकस्य स्थानिवद्भावस्य निषेध इत्युक्ते तत्र पदान्तादिविधिः प्रतिबन्धव्य इत्यर्थः। यथा - कानि सन्ति इत्यादौ इकारस्य यणादेशः क्रियते चेत् स पदान्तो भविष्यति, स प्रतिबन्धव्यः। तदर्थञ्च श्नसोरल्लोप इत्यनेन विहितस्य अल्लोपस्य स्थानिवद्भावः प्रतिषिध्यते। स्थानिवद्भावे सति यणादेशो भविष्यति, यः पदान्तो भवेत्। इह स्थानिलक्षणप्रतिषेधार्थं स्थानिवद्भावः प्रतिषेध्यः। एषो यन् हसतीत्यादौ रोः हशिचेत्युकारादेशे कृते स पदान्तो भविष्यति, स आवश्यकः। तदर्थञ्च इणो यणित्यनेन विहितस्य यकारादेशस्य स्थानिवद्भावः प्रतिषिध्यते। स्थानिवद्भावे सति उकारादेशो न भविष्यति, ततश्च स पदान्तो न सिध्येत्। इह आदेशलक्षणभावार्थं स्थानिवद्भावः प्रतिषेध्यः।

### 3.0 क्विलुगुपधात्वेत्यादीनि वार्तिकानि

**शेखरे - एतत्सूत्रभाष्य-कमेर्णिङित्यादिसूत्रभाष्यैः पूर्वत्रासिद्धे न स्थानिवत् इत्यवष्टभ्य वरेयलोपस्वरदीर्घग्रहणवर्जं द्विर्वचनादि प्रत्याख्यातमिति लभ्यते।**

नपदान्तसूत्रे भाष्ये - क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्, पूर्वत्रासिद्धे च, द्विर्वचनादीनि च, वरेयलोपस्वरवर्जम् - इति वार्तिकानि पठितानि।

णिजन्तात् पचधातोः क्तिनि णेरनिटीति णिलोपे पाच् ति इति जाते परनिमित्तकस्य णिलोपस्य स्थानिवद्भावात् ततः पूर्वस्य चकारस्य चोः कुः इति कुत्वं

न सिध्येत्। पाक्तिरिति तु इष्यते। तथा यङन्तात् पचधातोः पापक्तिरिति रूपमिष्यते। पापच् यङ् ति इति स्थिते अतो लोप इति यङकारस्य लोपे लोपो व्योर्वलीति यकारलोपे च कृते चकारस्य चोः कुरिति कुत्वमावश्यकम्। अल्लोपस्य स्थानिवद्भावे सति तन्न सिध्येत्। एवं याष्टिः, यायष्टिः, स्कन्दयतीति स्कन्, काष्ठं तक्षयतीति काष्ठतक् इत्यादीनि बहूनि रूपाणि अचः परस्मिन् इति स्थानिवद्भावे सति न सिध्यन्तीति तेषां सिध्यर्थं पूर्वत्रासिद्धे न स्थानिवदिति व्यापकं निषेधवाक्यं प्रणेयमिति वार्तिकार्थः।

न पदान्तपूर्वत्रासिद्धीयवरेयलोपस्वरविधिषु इति सूत्रं कर्तव्यम्। तथाच द्विर्वचनसवर्णाः नुस्वारदीर्घग्रहणं न कर्तव्यं भवतीति लाघवम्। तेषां पूर्वत्रासिद्धीयत्वादेव सिद्धेः। कमेर्णिङित्यत्र तु भाष्ये - एतदिदानीं दीर्घग्रहणस्य प्रयोजनम् दीर्घविधिं प्रत्यजादेशो न स्थानिवत् इति चिण्णमुलोर्दीर्घोन्यतरस्याम् इति दीर्घग्रहणस्य नपदान्तसूत्रेण स्थानिवद्भावनिषेधसिद्धिः प्रयोजनमिति प्रतिपादितम्। तथाच नपदान्तसूत्रे दीर्घविधिग्रहणेन न केवलं त्रैपादिकदीर्घविधेः ग्रहणम्। अतः पूर्वत्रासिद्धे न स्थानिवदिति वचनेन नपदान्तसूत्रस्थदीर्घग्रहणस्य अगतार्थत्वात् वरेयलोपस्वरदीर्घग्रहणवर्जम् इति स्वीकरणीयम् - इति नागेशमतम्। चिण्णमुलोर्दीर्घोऽन्यतरस्याम् इत्यत्र चिण्णमुलोरन्यतरस्याम् इत्येवं मितां ह्रस्व इति पूर्वसूत्रोक्तो ह्रस्व एव विकल्प्यतां दीर्घविधिः किमर्थ इति प्रश्ने ह्रस्वे विकल्प्यमाने स ण्यन्तात् णौ णिलोपस्य स्थानिवद्भावात् न सिध्यतीति समाधानम्। दीर्घविकल्पे तु नपदान्तसूत्रेण स्थानिवत्त्वनिषेधः।